CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

सायणाचार्यकृता

तैत्तिरीयसंहिताभाष्यभूमिका

(हिन्दीभाष्यसहिता)

डॉ० वामदेवमिश्रः

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

सायणाचार्यकृता

तैत्तिरीयसंहिताभाष्यभूमिका

(हिन्दीभाष्यसहिता)



डॉ० वामदेवमिश्रः

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

प्रकाशक
गीता संस्कृत प्रकाशन
के २०/१४० राजमन्दिर
वाराणसी--१

मूल्यः ५.००
आवृति–प्रथम ५००



मुद्रक :—
प्राणलाल आचार्य
आचार्य मुद्रणालय
ए १/१२ गायघाट, वाराणसी

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

पुरोवाक्

स्थाणुरयं भारहारः किलाभूत्
अधीत्य वेदं न विजानति योऽर्थम् ।
योऽर्थज्ञ इत्सकलं भद्रमश्नुते
नाकमेति ज्ञानविधूतपाप्मा ॥

विश्ववाङ्मय में मन्त्रब्राह्मणात्मक वैदिक वाङ्मय का महत्त्वपूर्ण स्थान है। इनमें प्रायः मन्त्रभाग का संग्रह वैदिक संहिताओं में और मन्त्रभाग का व्याख्यानरूप ब्राह्मणभाग स्वतन्त्र ब्राह्मण ग्रन्थों के रूप हैं। केवल कृष्णयजुर्वेद की संहिताओं में मन्त्र एवं ब्राह्मण भाग समवेत रूप से विद्यमान हैं। इनके भाष्यकारों की अलग अलग स्वतन्त्र प्राचीन परम्पराएँ हैं। वैदिक भाष्यकारों में आचार्य सायण का महत्त्वपूर्ण स्थान है। इन्होंने तैत्तिरीय, ऋग्वेद, सामवेद, काण्व तथा अथर्ववेद इन पांच संहिताओं पर एवं तैत्तिरीय ब्राह्मण, तैत्तिरीय आरण्यक, ऐतरेयब्राह्मण, ऐतरेय आरण्यक, ताण्ड्य, षड्विंश, सामविधान, आर्षेय, देवताध्याय उपनिषद, संहितोपनिषद, वंश एवं शतपथ ब्राह्मणग्रन्थों पर, जिनकी संख्या पन्द्रह है, विद्वत्तापूर्ण प्रौढ पाण्डित्यपूर्ण भाष्य किया है। साथ ही प्रत्येक भाष्य के प्रारम्भ में अलग अलग स्वतन्त्र भाष्यभूमिकाओं का उपनिबन्धन किया है। इन भाष्यभूमिकाओं में विविध विवादपूर्ण वैदिक तथ्यों पर विचार किया गया है। इनमें अन्यतम लघुकाय तैत्तिरीयसंहिताभाष्यभूमिका है।

इस भाष्यभूमिका में 'वेद' पद के अर्थ की समीक्षा, स्वाध्यायोऽध्येतव्यः इस विधिवाक्य पर विचार, वेद के विषय का विभाग, उत्तरकाण्ड का विषय, दर्शपूर्णमास का आदित्व यजुर्वेद का प्राधान्य, मन्त्र के भेद, प्रथम अनुवाक् का विषय, वत्सापाकरण का प्राथम्य तथा तैत्तिरीय संहिता की काण्डानुक्रमणिका का संग्रह है।

प्रस्तुत प्रणयन का आधारभूत संस्करण चौखम्भा-संस्कृत-संस्थान से प्रकाशित एवं पद्मविभूषण आचार्य बलदेव उपाध्याय के द्वारा सम्पादित वेदभाष्यभूमिकासंग्रह है। इस ग्रन्थ के प्रारम्भ में स्वतन्त्र रूप से मूलांश

Funding by IKS, MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

आध्वर्यवं क्वचित् हौत्रं
क्वचिदित्यव्यवस्थया ।
बुद्धिमालिन्यहेतुत्वाद्
यजुः कृष्णमितीर्यते ॥

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

तैत्तिरीयसंहिताभाष्यभूमिका

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

सायणाचार्यकृता

तैत्तिरीयसंहितायाः[1]

भाष्यभूमिका

वागीशाद्याः सुमनसः सर्वार्थानामुपक्रमे ।
यं नत्वा कृतकृत्याः स्युस्तं नमामि गजाननम् ॥ १ ॥
यस्य निःश्वसितं वेदा यो वेदेभ्योऽखिलं जगत् ।
निर्ममे तमहं वन्दे विद्यातीर्थमहेश्वरम् ॥ २ ॥
यत्कटाक्षेण तद्रूपं दधद् बुक्कमहीपतिः ।

श्रीमङ्गलमूर्तये नमः

१. सम्प्रदायभेदात् शाखावाहुल्यं वेदस्य । तथाह महाभाष्यकारः पस्पशाह्निके–'एकशतमध्वर्युशाखाः, सहस्रवर्त्मासामवेदः, एकविंशतिधाबाह्वृच्यम्, नवधाऽथर्वणो वेदः' इति कृष्णशुक्लत्वभेदेन यजुर्वेदान्तर्गतशाखाशतस्य द्वैविध्यम् । तत्र

आध्वर्यवं क्वचित् हौत्रं क्वचिदित्यव्यवस्थया ।
बुद्धिमालिन्यहेतुत्वाद् यजुः कृष्णमितीर्यते ॥

कृष्णयजुर्वेदसंहिताया भाष्यं सर्वप्रथमं निबंबन्ध तत्रभवान् सायणाचार्यः । यथोक्तं तेनैव ऋग्वेदभाष्योपक्रमणिकायाम् —

आध्वर्यवस्य यज्ञेषु प्राधान्याद् व्याकृतः पुरा ।
यजुर्वेदोऽथ हौत्रार्थमृग्वेदो व्याकरिष्यते ॥ इति

तैत्तिरीयशाखाध्यायित्वात् तस्य तस्या व्याकृतौ प्रथमा प्रवृत्तिरिति बोध्यम् ।

२. इतः पूर्वं केषुचित् पुस्तकेषु श्लोकपञ्चकमधिकं दृश्यते तद् यथा —

गजवदनमचिन्त्यं तीक्ष्णदन्तं त्रिनेत्रं बृहदुदरविशेषं भूतराजं पुराणम् ।
अमरवरमुपूज्यं रक्तवर्णं सुरेशं पशुपतिसुतमीशं विघ्नराजं नमामि ॥ १ ॥
मूलाधारे चतुष्पत्रे पद्मकिञ्जल्कशोभिते ।
दाडिमीकुसुमप्रख्ये अरुणादित्यसन्निभे ॥ २ ॥
भगाख्य कुण्डलीचक्रे पूजयेत् परमेश्वरीम् ।
अङ्कुशं चाक्षसूत्रं च पाशपुस्तकधारिणीम् ॥
मुक्ताहारसमायुक्तां देवीं ध्यायेच्चतुर्भुजाम् ॥ ३ ॥
कपिलसटमुदञ्चत्कर्णमग्नीन्द्रिनाक्ष विवृतवदनमविद्युज्जिह्वमुत्फल्लनासम् ।
अरिदरकरयुग्मं योगपट्टाङ्गजानुस्थितकरमरुणाङ्घ्रि श्रीनृसिंहं नतोऽस्मि ॥ ४ ॥
नमामि विष्णुं विधियज्ञरूपं सरस्वतीं चापि तदीयजिह्वाम् ।
त्रैविद्यवृद्धान् विदुषो गुरूंश्च गोपायनाचार्यपदद्वयं च ॥ ५ ॥

Funding by MoE-IKS

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

आदिशन्माधवाचार्य्यं वेदार्थस्य प्रकाशने ॥ ३ ॥

[1]स प्राह नृपतिं राजन्! सायणार्यो ममानुजः।
सर्वं वेत्त्येष वेदानां व्याख्यातृत्वे नियुज्यताम् ॥ ४ ॥

इत्युक्तो माधवार्येण वीरबुक्कमहीपतिः।
अन्वशात् सायणाचार्यं वेदार्थस्य प्रकाशने ॥ ५ ॥

ये पूर्वोत्तरमीमांसे ते व्याख्यायातिसङ्ग्रहात्।
कृपालुर्माधवाचार्य्यो वेदार्थं वक्तुमुद्यतः ॥ ६ ॥

ब्राह्मणं कल्पसूत्रे द्वे मीमांसा व्याकृतिं तथा।
उदाहृत्याथ तैः सर्वैर्मन्त्रार्थः स्पष्टमीर्य्यते ॥ ७ ॥

ननु कोऽयं वेदो नाम, किं च तल्लक्षणम्, के विषयप्रयोजनसम्बन्धाधिकारिणः, कथं वा तस्य प्रमाण्यम्? न खल्वेतस्मिन् सर्वस्मिन्नसति, वेदो व्याख्यानयोग्यो भवति। अत्रोच्यते। इष्टप्राप्त्यनिष्टपरिहारयोरलौकिमुपायं यो ग्रन्थो वेदयति स वेदः। अलौकिकपदेन प्रत्यक्षानुमाने व्यावर्त्येते। अनुभूयमानस्य सक्चन्दनवनितादेरिष्टप्राप्तिहेतुत्वं, औषधसेवादेरनिष्टपरिहारहेतुत्वञ्च प्रत्यक्षतः सिद्धम्। स्वेनानुभविष्यमाणस्य पुरुषान्तरगतस्य च तथात्वमनुमानगम्यम्। एवं तर्हि भाविजन्मगतसुखादिकमपि अनुमानगम्यमिति चेत्, न तद्विशेषस्यानवगमात्। न खलु ज्योतिष्टोमादिरिष्टप्राप्तिहेतुः कलञ्जभक्षणवर्जनादिरनिष्टपरिहारहेतुरित्यमुमर्थं वेदव्यतिरेकेणानुमानसहस्रेणापि तार्किकशिरोमणिरप्यवगन्तुं शक्नोति। तस्मादलौकिकोपायबोधको वेद इति लक्षणस्य नातिव्याप्तिः।

वेदपदार्थसमीक्षा

अत एवोक्तम्—

'प्रत्यक्षेणानुमित्या वा यस्तूपायो न बुध्यते।
एतं विदन्ति वेदेन तस्माद्वेदस्य वेदता॥' इति

स एवोपायो वेदस्य विषयः। तद्बोध एव प्रयोजनम्। तद्बोधार्थी च अधिकारी। तेन सह उपकार्योपकारकभावः सम्बन्धः। नन्वेवं सति स्त्रीशूद्रसहिताः सर्वे वेदाधिकारिणः स्युः, इष्टं मे स्यादनिष्टं मा भूदिति आशिष सार्वजनीनत्वात्। मैवं, स्त्रीशूद्रयोः सत्युपाये बोधार्थित्वे हेत्वन्तरेण वेदाधिकारस्य प्रतिबद्धत्वात्। उपनीतस्यैवाध्ययनाधिकारं ब्रुवच्छास्त्रमनुपनीतयोः स्त्रीशूद्रयोर्वेदाध्ययनमनिष्टप्राप्तिहेतुरिति बोधयति। कथं तर्हि तयोरतदुपायावगमः, पुराणादिभिरिति ब्रूमः।

अत एवोक्तम्—

'स्त्रीशूद्रद्विजबन्धूनां त्रयी न श्रुतिगोचरा।
इति भारतमाख्यानं मुनिना कृपया कृतम्' ॥ (भागवत १।४।२५) इति

१. एतत् श्लोकद्वयं केषुचित् न दृश्यते ॥

Digitized by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

तस्मादुपनीतैरेव त्रैवर्णिकैर्वेदस्य सम्बन्धः ।

तत्प्रामाण्यं तु बोधकत्वात् स्वत एव सिद्धम् । पौरुषेयवाक्यं तु बोधकमपि सत् पुरुषगतभ्रान्तिमूलत्वसम्भावनया तत्परिहाराय मूलप्रमाणमपेक्षते, न तु वेदः । तत्य नित्यत्वेन वक्तृदोषशङ्कानुदयात् । एतदेवजैमिनिना सूत्रितम्– 'तत्प्रमाणं बादरायणस्यानपेक्षितत्वात् (मी० १।१।५) इति ।[1]

ननु वेदोऽपि कालिदासादिवाक्यवत् पौरुषेय एव ब्रह्मकार्यत्वश्रवणात्–

'ऋचः सामानि जज्ञिरे ।
छन्दांसि जज्ञिरे तस्माद्
यजुः तस्मादजायत' ॥ (ऋ० १०।९०।९) इति श्रुतेः ।

अत एव बादरायणः 'शास्त्रयोनित्वात्' (वे० १।१।३) इति सूत्रेण ब्रह्मणो वेदकारणत्वमवोचत् । मैवं, श्रुतिस्मृतिभ्यां नित्यत्वावगमात् ।

'वाचा विरूप नित्यया' इति श्रुतेः (ऋ० ८।७५।६)[2]

'अनादिनिधना नित्या वागुत्सृष्टा स्वयम्भुवा', इति स्मृतेश्च ।

बादरायणोऽपि देवताधिकरणे सूत्रयामास । 'अत एव च नित्यत्वम्' (वे० १ । ३ । २९) इति[3] । तर्हि परस्परविरोध इति चेत्, न नित्यत्वस्य व्यावहारिकत्वात् । सृष्टेरूर्ध्वं संहारात् पूर्वं व्यवहारकालः, तस्मिन्नुत्पत्ति विनाशादर्शनात् । कालाकाशादयो यथा नित्या एवं वेदोऽपि व्यवहार-

---

१. 'औत्पत्तिकस्तु शब्दस्यार्थेन सम्बन्धस्तस्य ज्ञानोपदेशोऽव्यतिरेकश्चार्थेऽनुपलब्धे, तत्प्रमाणं बादरायणस्यानपेक्षितत्वात्' इति सम्पूर्णं सूत्रम् । तत्रेदमित्थं व्याख्यातं शबरस्वामिना स्वभाष्ये–'औत्पत्तिक इति नित्यं ब्रूमः । उत्पत्तिर्हि भाव उच्यते लक्षणया । अवियुक्तः शब्दार्थयोर्भावः सम्बन्धो, नोत्पन्नयोः पश्चात् सम्बन्धः । औत्पत्तिकः शब्दस्यार्थेन सम्बन्धः, तस्य अग्निहोत्रादिलक्षणस्य धर्मस्य निमित्तं प्रत्यक्षादिभिरनवगतस्य । कथम् । उपदेशो हि भवति । उपदेश इति विशिष्टस्य शब्दस्योच्चारणम् । अव्यतिरेकश्च ज्ञानस्य । नहि तदुत्पन्नं ज्ञानं न विपर्येति, न तच्छक्यते वक्तुम्, एतदेवमिति । यथा भवति–यथा विज्ञायते, न तथा भवति-तथैतन्न विज्ञायते, तथैतदिति अन्यदस्य हृदये अन्यद् वाचि स्यात् । एवं वदतो विरुद्धमिदं गम्यते अस्ति वेति, तस्मात् तत्प्रमाणमनपेक्षत्वात् । नहि एवं सति प्रत्ययौ ह्यसौ । बादरायणग्रहणं बादरायणस्येदं मतं कीर्त्यते बादरायणं पूजयितुम्, नात्मीयं मतं पर्युदासितुम् ।'

२. तदिदमेवं व्याख्यातवन्तः श्रीशङ्करभगवत्पादाः– महत ऋग्वेदादेः शास्त्रस्यानेकविद्यास्थानोपबृंहितस्य प्रदीपवत् सर्वार्थावद्योतिनः सर्वज्ञकल्पस्य योनिः कारणं ब्रह्म । नहीदृशस्य शास्त्रस्यर्ग्वेदादिलक्षणस्य सर्वज्ञगुणान्वितस्य सर्वज्ञादन्यतः सम्भवोऽस्ति ।

३. तस्मै नूनमभिद्यवे वाचा विरूप नित्यया । वृष्णे चोदस्व सुष्टुतिम् ॥

'हे विरूप नानारूपैतन्नामक महर्षे त्वं तस्मै सिद्धायाभिद्यवेऽभिगततृप्तये वृष्णे वर्षकायाग्नये नित्ययया उत्पत्तिरहितया वाचा मन्त्ररूपया सुष्टुतिं नूनमिदानीं चोदस्व । स्तुहीत्येव मृषिः आत्मानं ब्रवीति यजमानो होतारं वा विरूपम्' इति तत्रत्थं सायणभाष्यम् ।

४. अत एव नियताकृतेर्देवादेर्जगतो वेदशब्दप्रभवत्वात् वेदशब्दे नित्यत्वमपि प्रत्येतव्यमिति शाङ्करभाष्यात् Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

काले कालिदासादिवाक्यवत् पुरुषविरचितत्वाभावान्नित्यः आदिसृष्टौ तु कालाकाशादिवदेव ब्रह्मणः सकाशाद्वेदोत्पत्तिराम्नायते । अतो विषयभेदान्न परस्परविरोधः । ब्रह्मणो निर्दोषत्वेन वेदस्य वक्तृदोषाभावात् स्वतरिसद्धं प्रामाण्यं तदवश्यम् । तस्माल्लक्षणप्रमाणसद्भावाद्विषयप्रयोजनसम्बन्धाधिकारिसत्त्वात् प्रामाण्यस्य सुस्थत्वाच्च वेदो व्याख्यातव्य एव ।

यथोक्तविषयादिसद्भावमभिप्रेत्य 'स्वाध्यायोऽध्येतव्यः' (तै० आ० २।१५) इत्यध्ययनं विधीयते । पाठ-

'स्वाध्यायोऽध्येतव्यः' इति विधिवाक्यसमीक्षा मात्रस्याध्ययनशब्दवाच्यत्वेनार्थावबोधस्याविहितत्वाद्वेदव्याख्यानमयुक्तमिति चेत्, न । विधेर्बोधपर्य्यवसायित्वात् । एतच्च भट्टगुरुमतानुसारिभिर्बहुधा प्रपञ्चितम् आम्नायते च —

'यदधीतमविज्ञातं निगदेनैव शब्द्यते ।
अनग्नाविव शुष्कैधो न तज्ज्वलति कर्हिचित्' ॥
'स्थाणुरयं भारहारः किलाभूत्
अधीत्य वेदं न विजानाति योऽर्थम् ।
योऽर्थज्ञ इत्सकलं भद्रमश्नुते
नाकमेति ज्ञानविधूतपाप्मा ॥ (नि १ । ६)

'ब्राह्मणेन निष्कारणो धर्म्मो षडङ्गो वेदोऽध्येयो ज्ञेयश्च' इति । एवं तर्हि ज्ञानस्य पृथग्विधानाद्ध्ययनं पाठमात्रमिति चेत्, अस्तु नाम, वर्णयन्त्येव शाङ्करदर्शनानुसारिणः ।

क्रतुविधिभिरेवानुष्ठानान्यथानुपपत्त्या वेदार्थज्ञानस्य प्रापितत्वान्नैतद्विधेयमिति चेत्, तद्विधिबलाद्वेदनमात्रेण स्वतन्त्रं किञ्चिदपूर्व्वमस्तु । श्रूयते ह्यनुष्ठानज्ञानयोः स्वतन्त्रं पृथक् फलम् —

'सर्वं पाप्मानं तरति तरति ब्रह्महत्यां योऽश्वमेधेन यजते य उ चैनमेवं वेद' इति ।

अल्पप्रयाससाध्येन वेदनेन तत्सिद्धौ बह्वायाससाध्यमनुष्ठानं व्यर्थं स्यादिति चेत्, न । तरणीयाया ब्रह्महत्याया मानसिककायिकत्वादिभेदेन तारतम्योपपत्तेः । मनसा सङ्कल्पिता वाचाभ्यनुज्ञाता वा परहस्तेन कारिता स्वयं कृता पुनः पुनः कृता चेत्येवं तारतम्येनावस्थिता ब्रह्महत्या अनेकविधा । अतस्तरणमप्यनेकविधं यथा स्वर्गो बहुविधस्तद्वत् । 'अग्निहोत्रं जुहुयात् स्वर्गकामः' 'दर्शपौर्णमासाभ्यां स्वर्गकामो यजेत', 'ज्योतिष्टोमेन स्वर्गकामो यजेत्', इत्यादयुच्चावचकर्म्मणामेकविधफलासम्भवात् स्वर्गो बहुविधः । यत्तु कर्म्मानुष्ठानकालीनं वेदनं तत्कर्मफल एवातिशयं दर्शयति । 'उभौ कुरुतो यश्चैतदेवं वेद न वेद' इति विद्वदविद्वत्प्रयोगौ प्रस्तुत्य, 'यदेव विद्यया करोति तदेव वीर्य्यवत्तरं भवति' इत्याम्नायात् । अङ्गोपासितविषयमेतद्वाक्यमिति चेत्, न । न्यायस्य समानत्वात् । अस्ति ह्यस्यार्थस्य [illegible] । प्रजापतिः किल सोमयागे-

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

भ्योऽर्वाचीनानग्निहोत्रपौर्णमास्यामावास्यनामकान् परस्परमुच्चावचान् यज्ञान् ससर्ज । सोमयागांश्चाग्निहोत्रादिभ्यः प्रौढानग्निष्टोमोक्थ्यातिरात्रनामकान् परस्परमुच्चावचान् सृष्ट्वाप्रथमसृष्टेष्वग्निहोत्रादिष्वभिमानविशेषेण वर्गद्वयं तुलयोदमिमीत । एतत् वृत्तान्तं विजानतोऽग्निहोत्रादिभिरग्निष्टोमादिफलं भवति । तथा च ब्राह्मणमाम्नायते—

'प्रजापतिर्यज्ञानसृजत । अग्निहोत्रञ्चाग्निष्टोमञ्च । पौर्णमासीञ्चोक्थ्यञ्च । अमावास्याञ्चातिरात्रञ्च तानुदमिमीत । यावदग्निहोत्रमासीत्तावानग्निष्टोमः । यावती पौर्णमासी तावानुक्थ्यः । यावत्यमावास्या तावानतिरात्रः । य एवं विद्वानग्निहोत्रं जुहोति, यावदग्निष्टोमेनोपाप्नोति तावदुपाप्नोति । य एवं विद्वान् पौर्णमासीं यजते, यावदुक्थ्येनोपाप्नोति तावदुपाप्नोति । य एवं विद्वानमावास्यां यजते, यावदतिरात्रेणोपाप्नोति तावदुपाप्नोति' इति । तदेतद्वेदनस्य सर्वत्र स्वतन्त्रफलकत्वं लिङ्गम् । किञ्च तत्तद्विधिसमीपे य एवं वेदेति वचनानि वेदनादेव फलं ब्रुवते । तान्यर्थवादरूपाणीति चेत्, अस्तु नाम । सहामहे चैतमपराधं तेषां वचनानां विधेयार्थप्रशंसापरत्वात् । तर्हि 'यत्परः शब्दः स शब्दार्थः', इति न्यायेन स्वार्थे प्रामाण्यं नास्तीति चेत्, न । महातात्पर्यस्य विधेयविषयत्वेऽप्यवान्तरतात्पर्यस्य स्वार्थविषयतानिवारणात् । 'ग्रावाणः प्लवन्ते' इत्यर्थवादस्यापि स्वार्थप्रामाण्यं प्रसज्येतेति चेत्, न । प्रमाणान्तरबाधितत्वात् । 'द्विः संवत्सरस्य सस्यं पच्यते' इत्याद्यर्थवादस्य तु बाधाभावेऽप्यनुवादत्वान्न स्वार्थे प्रामाण्यम् । वेदनफलवचनानि तु नानुवादकानि नापि बाध्यानि । तस्मादर्थवादत्वेऽप्यस्त्येषां स्वार्थे प्रामाण्यम् । अन्यथा मन्त्रार्थवादादिभ्यो देवादीनां विग्रहादिमत्त्वं न सिध्येत् ।

अत एवोक्तम्—

'विरोधे गुणवादः स्यादनुवादोऽवधारिते ।
भूतार्थवादस्तद्ज्ञानादर्थवादस्त्रिधा मतः ॥' इति

किं बहुना । विद्यत एवावश्यं वेदनमात्रादपूर्वम् । अतो वेदनाय वेदो व्याख्यायते । योऽयं विषयरूप इष्टप्राप्त्यनिष्टपरिहारोपायः सामान्यतो निर्दिष्टः स विशेषेण स्पष्टीक्रियते ।

वेदविषयविभागविवरणम्

वेदस्तावत् काण्डद्वयात्मकः । तत्र पूर्वस्मिन् काण्डे नित्यनैमित्तिककाम्यनिषिद्धरूपं चतुर्विधं कर्म्म प्रतिपाद्यम् । 'यावज्जीवमग्निहोत्रं जुहोति' इत्यादिकं नित्यं, तस्य नियतनिमित्तत्वात् । 'यस्य गृहान् दहत्यग्नयेक्षामवते पुरोडाशमष्टाकपालं निर्वपेत्' इत्यादिकं नैमित्तिकं, तस्यानियतनिमित्तत्वात् । 'चित्रया यजेत पशुकामः' इत्यादिकं काम्यम् । 'तस्मान्मलवद्वाससा न संवदेत न सहासीत' इत्यादिकं निषिद्धम् । तेषु नित्यनैमित्तिकानुष्ठानात्तदकरणे प्रत्यवायरूपमनिष्टं परिहियते । स च प्रत्यवायो याज्ञवल्क्येन

Funding by MoE-IKS

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

स्मर्य्यते –

'विहितत्याननुष्ठानान्निन्दितस्य च सेवनात्।
अनिग्रहाच्चेन्द्रियाणां नरः पतनमृच्छति ॥' (या० स्मृ० ३।१९) इति

यावज्जीवादिवाक्येष्वनुक्तोऽप्यवर्जनीयतया स्वाभीष्टः स्वर्गः प्राप्यते। तथा चापस्तम्बः–'तद्यथा आम्रे फलार्थे निर्म्मितेच्छायागन्धावित्यनूत्पद्येते एवं धर्म्मेऽपि चर्य्यमाणेऽर्था अनूत्पद्यन्ते' इति। काम्यस्येष्टप्राप्तिहेतुत्वं तद्विधिवाक्य एवं स्पष्टम्। इष्टविघातमनिष्टञ्चार्थात् परिह्रियते। निषिद्धवर्जनेन रागप्राप्तनिषिद्धानुष्ठानजन्यो नरकपातः परिह्रियते। न केवलं नित्यनैमित्तिकाभ्यामानुषङ्गिकस्वर्गप्राप्तिः, किन्तु धीशुध्यादिविविदिषोत्पादनद्वारा ब्रह्मज्ञानहेतुत्वमपि तयोरस्ति। तथा च वाजसनेयिनः समामनन्ति––'तमेतं वेदानुवचनेन ब्राह्मणा विविदिषन्ति यज्ञेन दानेन तपसाऽनाशकेन' इति। एवं तर्हि पूर्व्वकाण्ड एवाशेषपुरुषार्थसिद्धेः कृतमुत्तरकाण्डेनेति चेत्, न। अपुनरावृत्तिलक्षणस्यात्यन्तिकपुरुषार्थस्य तत्रासिद्धेः। अत एवाथर्वणिकाः कर्म्मिणो दक्षिणमार्गेण चन्द्रप्राप्तिं पुनरावृत्तिं चामनन्ति–'स सोमलोके विभूतिमनुभूय पुनरावर्त्तते' इति।

उत्तरकाण्डविषयसमीक्षणम्

अत उत्तरकाण्ड आरब्धव्यः। आत्यन्तिकपुरुषार्थसिद्धिश्च द्विविधा सद्योमुक्तिः क्रममुक्तिश्चेति। वर्त्तमानदेहपातानन्तरमेव सिध्यति सद्योमुक्तिः। उत्तरमार्गेण गत्वा ब्रह्मलोके चिरं भोगाननुभूय तत्रोत्पन्नज्ञानस्य ब्रह्मलोकावसाने सिध्यति क्रममुक्तिः। तस्मादुत्तरकाण्डे ब्रह्मोपदेशो ब्रह्मोपास्तिश्चेत्युभयं प्रतिपाद्यते। ब्रह्मोपास्तिप्रसङ्गाद् ब्रह्मदृष्ट्या प्रतीकमुपास्यत्वेन सांसारिकफलकामिनमुद्दिश्य प्रतिपाद्यते। ब्रह्मोपासकप्रतीकोपासकयोः समानेऽप्युत्तरमार्गे प्रतीकोपासकस्य विद्युल्लोकादूर्ध्वं ब्रह्मलोकगमनाभावेन क्रममुक्तेरप्यभावादस्ति पुनरावृत्तिः। एतच्च 'अप्रतीकालम्बनान् नयति' इत्यधिकरणे (वे० ४।३।१५–१६) द्रष्टव्यम्।

दर्शपूर्णमासयोरादित्वम्

नन्वस्त्वेवं पूर्वोत्तरकाण्डयोस्तत्र तत्रोचितप्रयोजनं फलविशेषश्च तथापि पूर्व्वकाण्डस्यादौ कर्म्मान्तरं परित्यज्य दर्शपूर्णमासेष्टिरेव कुतः प्रतिपाद्यत इति चेत्, प्रकृतित्वान्निरपेक्षत्वाच्चेति ब्रूमः। प्रकर्षेण अङ्गोपदेशो यत्र क्रियते सा प्रकृतिः। कृत्स्नाङ्गविषयत्वमुपदेशस्य प्रकर्षः। विकृतिषु तु विशेषाङ्गमात्रस्योपदेशः क्रियते अङ्गान्तराणि तु प्रकृतेरतिदिश्यन्ते। अतोऽतिदेशस्य प्रकर्षाभावः। प्रकृतिस्त्रिविधा––अग्निहोत्रमिष्टः सोमश्चेति। त्रिष्वप्येतेषु अन्यतरापेक्ष्येऽप्यङ्गेषु दीक्षणीयाप्रायणीयादिषु दर्शपूर्णमासेष्टिसापेक्षत्वान्न पूर्व्वभावित्वं युक्तम्। इष्टेस्तु सोमयागनैरपेक्ष्यात् सोमात् प्राचीनत्वं युक्तम्। यद्यप्यग्निहोत्रस्य स्वरूपेऽङ्गेषु वा

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

नास्त्यन्यापेक्षा तथाप्यग्निसिद्ध्यपेक्षत्वादाहवनीयाद्यग्नीनाञ्च पावमानेष्टिसाध्यत्वात्, पावमानेष्टीनां च दर्शपूर्णमासविकृतित्वात् परम्परयाऽग्निहोत्रस्य दर्शपूर्णमासापेक्षास्तीति प्रथममाधित्वं न युक्तम्। दर्शपूर्णमासयोरग्निसाध्यत्वादग्निसाधकमाधानं प्रथमतो वक्तव्यमिति चेत्, मैवम्। नाधानमात्रेणाग्नयः सिध्यन्ति किन्तु पवमानेष्टिभिरपि। ताश्च इष्टयो दर्शपूर्णमासविकृतित्वात् साक्षादेव दर्शपूर्णमासावपेक्षन्ते। दर्शपूर्णमासौ तु अग्निद्वारा पवमानेष्टिसापेक्षावपि न साक्षाद् पवमानेष्टीरपेक्षेते। अतो निरपेक्षत्वादर्शपूर्णमासेष्टिरेव प्रथमं वक्तव्या। ऋग्वेदसामवेदयोरादौ दर्शपूर्णमासेष्टिर्नाम्नातेति चेत्, बाढम्।

यजुर्वेदस्य प्राधान्यम्

यजुर्वेदमपेक्ष्य दर्शपूर्णमासयोरादित्वमुक्तं कर्मकाण्डविषये यजुर्वेदस्यैव प्राधान्यात्। आनुपूर्व्यात् कर्मणां स्वरूपं यजुर्वेदे सामाम्नातम्। तत्र तत्र विशेषापेक्षायामपेक्षितायां याज्यापुरोऽनुवाक्यादय ऋग्वेदे समाम्नायन्ते, स्तोत्रादीनि तु सामवेदे। तथा सति भित्तिस्थानीयो यजुर्वेदः, चित्रस्थानीयावितरौ। तस्मात् कर्मसु यजुर्वेदस्य प्राधान्यं, तस्मिंश्च दर्शपूर्णमासेष्टिरादौ समाम्नाता। यद्यपि मन्त्रब्राह्मणात्मको वेदः, तथापि ब्राह्मणस्य मन्त्रव्याख्यानरूपत्वान्मन्त्रा एवादौ समाम्नाताः।

मन्त्रभेदाः

मन्त्राश्च त्रिविधाः ऋचः सामानि यजूंषि चेति। यत्र यजुषामध्वर्युवेदेऽतिबहुलत्वात् क्वचित् क्वचिदृचां सद्भावेऽपि यजुर्वेद इत्येवाख्यायते। अध्वर्युवेदत्वञ्चात्यादिसिद्धयाङ्गिकसमाख्यावलादवगन्तव्यम्। अस्मिन् वेदे समाख्याता दर्शपूर्णमासेष्टिमन्त्रास्त्रिविधाः, आध्वर्यवाः। 'सं त्वा सिञ्चामि' इत्यादौ पठिता याजमानाः। 'सत्यं प्रपद्ये' इत्यादौ पठिता होत्राः। एतेषां मध्ये याजमानानां हौत्राणाञ्च चित्रस्थानियत्वाद् भित्तिस्थानीयानामाध्वर्यवाणामेवादौ पाठो युज्यत इति।

प्रथमानुवाकविषयाः

तेऽपि आध्वर्यवाः 'इषे त्वा' इत्यादिषु त्रयोदशस्वनुवाकेषु अम्नाताः। तत्र प्रथमेऽनुवाके वत्सापाकरणार्था मन्त्राः। द्वितीये बर्हिःसम्मादनार्थाः। तृतीये दोहनार्थाः। चतुर्थे हविर्निर्वापार्थाः। पञ्चमे व्रीह्यवघातार्थाः। षष्ठे तण्डुलपेषणार्थाः। सप्तमे कपालोपधानार्थाः। अष्टमे पुरोडाशनिष्पादनार्थाः। नवमे वेदीकरणार्थाः। दशमे प्राधान्येनाज्यग्रहणार्थाः प्रसङ्गात् पत्नी संनहनार्थाः। एकादशे प्राधान्येनेध्मसंनहनार्था बर्हिरास्तरणाद्यर्थाश्च। द्वादशे आघारार्थाः। अत्र सामिधेनीप्रयाजाज्यभागप्रधानयागादिमन्त्राणां प्राप्तावसरत्वेऽपि तेषां हौत्रत्वात् तानुपेक्ष्योपरितनप्रयोगाङ्गभूता आध्वर्यवाः स्रुग्घ्यूहनादिमन्त्राश्च त्रयोदशे समाम्नाताः। तदेतत् सर्वं विनियोगसंग्रहकारेणेत्थं संगृहीतम्—

'ये दर्शपूर्णमासाङ्गमन्त्रा एते समासतः।
इषे त्वाऽऽद्यनुवाकेषु त्रयोदशसु वर्णिताः॥
वत्सापाकरणं बर्हिर्दोहो हविर्निरूपणे।
तण्डुलपेषणं कर्म कपालेषूपधानके॥

Digitized by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

पेषणञ्च कपालानि पुरोडाशश्च वेदिका ॥
आज्यग्रहेध्मसंनाहावाधारोपरितन्त्रके ।
इत्युक्ता अनुवाकार्थाः प्रतिमन्त्रं क्रियोच्यते' ॥ इति ।

वत्सापाकरणप्राथम्यम्

किमिदं वत्सापाकरणं, कथं वा तस्य प्राथम्यमिति चेत्, उच्यते। सन्ति दर्शयागे त्रीणि प्रधानानि हवींषि, पूर्णमासयागे च त्रीणि। आग्नेयोऽष्टाकपाल ऐन्द्रं दध्यैन्द्रं पय इति दर्शयागे। आग्नेयोऽष्टाकपाल आज्येन प्राजापत्य उपांशुयागोऽग्नीषोमीय एकादशकाल इति पूर्णमासे। तत्र प्रतिपद्दिने दधिहोमे दधिसम्पादनायामावस्यायां रात्रौ गावो दोग्धव्याः। तद्दोहनार्थं प्रातः काले लौकिकदोहनादूर्ध्वं स्वमातृभिः सह सञ्चरन्तो वत्सा मातृभ्योऽपाकरणीयाः। तदिदं वत्सापाकरणं यथोक्तरीत्या, तस्य प्राथम्यञ्च। तत्र वत्सापाकरणं सद्यश्छिन्नया पलाशशाखया कर्त्तव्यमिति। तच्छेदनार्थोऽयमिषे त्वेति मन्त्र आदौ समाम्नायते। तस्य च मन्त्रस्य तच्छेदनाङ्गत्वं ब्राह्मणे द्रष्टव्यम्। अत एव सब्राह्मणो मन्त्रो ज्ञातव्य इति। छन्दोगा अधीयते--

"यो ह ह वा अविदितार्षेयच्छन्दो दैवतब्राह्मणेन मन्त्रेण यजति याजयति वाध्यापयति वा स्थानं वर्च्छति गर्त्तं वा पात्यते प्रमीयते पापीयान् भवति। तस्मादेतानि मन्त्रे मन्त्रे विद्यात्" इति।

आर्षेय ऋषिसम्बन्धः। अतीन्द्रियार्थद्रष्टारो हि ऋषयः। तेषां वेदद्रष्टृत्वं स्मर्य्यते—

'युगान्तेऽन्तर्हितान् वेदान् सेतिहासान् महर्षयः।
लेभिरे तपसा पूर्व्वमनुज्ञाताः स्वयम्भुवा' ॥ इति।

इषे त्वादिनाञ्च मन्त्राणां प्रजापतिर्ऋषिः। तथा च काण्डानुक्रमणिकायामुक्तम्—

'शाखादि याजमानञ्च होतृन् हौत्रञ्च दार्शिकम्।
तद्विधीन् पितृमेधञ्च नवाहुः कस्य तद्विदः' ॥ इति।

तैत्तिरीयसंहिताकाण्डानुक्रमणिका

शाखादिरिषे त्वादिप्रपाठकः। याजमानं सं त्वा सिञ्चामीत्यादि। होतारः चित्तिः स्रुगित्यादयोः मन्त्राः। सत्यं प्रपद्य इत्यादिकं दार्शिकं हौत्रम्। तद्विधयः प्रोक्तानाञ्चतुर्विधमन्त्राणां चत्वारि ब्राह्मणानि। पितृमेधः परे युवा समित्यादिः। तान्येतानि नवकाण्डानि प्रजापतिना दृष्टानि। छन्दोविशेषाश्च वेदाङ्गभूते छन्दोनामके ग्रन्थे द्रष्टव्याः। मन्त्रपदव्याख्यानादेव तत् प्रतिपाद्यार्थरूपदेवता विज्ञायते। ब्राह्मणविशेषास्तु तत्तन्मन्त्रव्याख्यानावसर एवोदाह्रियते। यद्यपि मन्त्रविनियोगा ब्राह्मणे सर्वेऽपि नाम्नाताः तथापि कल्पसूत्रकारैर्ब्राह्मणान्तरपर्य्यालोचनया सर्वेऽभिहिताः। अतो बोधायनादिसूत्रोदाहरणादिपूर्व्वकं ब्राह्मणानुसारेण मन्त्रार्थं योजयामः।

॥ इति तैत्तिरीयसंहिताभाष्यभूमिका ॥

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

हिन्दी-भाष्य

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

तैत्तिरीय संहिता

भाष्य–भूमिका

ब्रह्मा आदि देवता सब प्रकार के कार्यों के आरम्भ में जिसको नमन करके कृतकृत्य होते है, ऐसे हाथी के मुखवाले गणेशजी को प्रणाम करता हूँ।

विद्यातीर्थ के रूप में उन महेश्वर की मैं वन्दना करता हूँ जिनके निःश्वास के रूप में वेद हैं और जिन्होंने समस्त जगन्मण्डल को वेदों से रचा है।

जिन विद्यातीर्थ महेश्वर की कृपा कटाक्ष से उनके स्वरूप को धारण करते हुए राजा बुक्कराय ने माधवाचार्य को वेद के अर्थ को प्रकाशित करने के लिये आदेश दिया।

उन्होंने राजा से कहा—हे राजन्! यह मेरा भाई सायणाचार्य वेद वेदाङ्ग आदि सब कुछ जानता है। इसे वेदों की व्याख्या करने के लिये नियुक्त कीजिये।

माधवाचार्य से ऐसा कहे जाने के बाद वीर बुक्कराय ने सायणाचार्य को वेदों का भाष्य लिखने के लिये नियुक्त किया।

जो पूर्वमीमांसा (वेद का कर्मकाण्डविषयक विचार) और उत्तरमीमांसा (वेद का ज्ञानकाण्ड विषयक विचार) हैं, उनकी बहुत विस्तार से व्याख्या करने के पश्चात् वेद के जिज्ञासुओं पर अनुग्रह करके माधवाचार्य (के कृपा प्राप्त उन्हीं के समक्ष विद्वान् सायणाचार्य) वेद के अर्थ के प्रकाशन में उद्यत हुए।

ब्राह्मण, बोधायन तथा आपस्तम्ब दोनों कल्पसूत्रों, मीमांसा, व्याकरण ग्रन्थ के सन्दर्भ, तथा उदाहरणों को प्रस्तुत करके उन सब की सहायता से मन्त्रों का अर्थ स्पष्ट रूप में प्रस्तुत किया जा रहा है।

पृ० २

यह वेद क्या है? उसका लक्षण क्या है? इसके विषय प्रयोजन सम्बन्ध और अधिकारी कौन है? वेद का प्रामाण्य वेद पदार्थ की समीक्षा क्या है? इन सब का विवरण बिना निश्चित हुए वेद व्याख्यान के योग्य नहीं है।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

यहाँ यह कहा जाता है कि—"इष्टप्राप्ति तथा अनिष्ट के परिहार के अलौकिक उपाय को जो ग्रन्थ बतलाता है, उसे वेद कहते हैं।" वेद के इस लक्षण में 'अलौकिक' पद को जोड़ने से प्रत्यक्ष और अनुमान प्रमाण का ग्रहण नहीं होता। माला चन्दन स्त्री आदि की प्राप्ति होने पर इष्ट वस्तु की प्राप्ति का अनुभव होता है और औषधि सेवा आदि के सुविधा प्राप्त होने से अनिष्ट रोग का परिहार हो जाता है, अतः दोनों में विद्यमान क्रमशः इष्टप्राप्ति तथा अनिष्ट परिहार प्रत्यक्ष सिद्ध है। अपने द्वारा दूसरों को माला आदि प्राप्त कराने से इष्ट प्राप्ति तथा औषधि आदि के सेवन कराने से अनिष्ट (रोग) के परिहार का अनुभव होगा यह अनुमान प्रमाण से मालूम हो जाता है।

ऐसा मानने पर भावी जन्म में सुख आदि की प्राप्ति अनुमानगम्य हो जायेगी! ऐसा नहीं, इससे विशेष अनुमान का बोध नहीं होता है।

ज्योतिष्टोम आदि यागों के द्वारा इष्ट फल प्राप्त होती है तथा कलञ्ज भक्षण आदि नहीं करने से अनिष्ट का परिहार होता है। इन तथ्यों को वेद को छोड़ कर हजारों अनुमान की प्रक्रिया लगाने पर भी तार्किक शिरोमणि समझा नहीं सकता (यह वेद के द्वारा ही सम्भव है)। अतः इष्ट प्राप्ति तथा अलौकिक अनिष्ट परिहार के उपाय का बोधक वेद है। इस लक्षण में अतिव्याप्ति नहीं है।

इसीलिये कहा गया है—

"प्रत्यक्ष और अनुमान के द्वारा (इष्ट प्राप्ति तथा अनिष्ट परिहार का) जो उपाय मालूम नहीं होता, उसे वेद के द्वारा जानते है। यही वेद का वेदपन है"।

इस प्रकार निश्चित किया हुआ उपाय ही वेद का विषय है। उसका बोध कराना ही वेद का प्रयोजन है। इस बोध की जानने की इच्छा करने वाला व्यक्ति ही अधिकारी है। विषय और अधिकारी साथ परस्पर उपकारी उपकार्य भाव सम्बन्ध है।

"ऐसा निश्चय करने पर स्त्री शूद्र आदि सभी वेदाध्ययन के अधिकारी हो जायेंगे क्योंकि सभी यह चाहते हैं कि मुझे इष्ट फल की प्राप्ति हो और अनिष्ट भोग का परिहार हो, यह कामना सर्वजनीन है"।

यह कथन उचित नहीं है। स्त्री और शूद्रों के लिये भी उपर्युक्त उपाय-बोध की अपेक्षा है किन्तु अन्य हेतु से स्त्री और शूद्र को वेदाध्ययन करने का अधिकार प्रतिबन्धित है। विधिवत् उपनय किये गये व्यक्ति को ही वेद के अध्ययन का अधिकार है। इस तथ्य का विवरण करते हुए शास्त्र यह भी बोध कराता है कि स्त्री और शूद्र को वेदाध्ययन करने से अनिष्ट प्राप्ति होती है।

ऐसी स्थिति में स्त्री और शूद्रों को इष्ट-प्राप्ति तथा अनिष्ट-परिहार का उपाय कैसे मालूम होगा? इसके समाधान में यह कहा गया है कि पुराण आदि के द्वारा उन्हें उपायबोध हो जायेगा।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

जैसा की श्रीमद्भागवत में भी यह कहा गया है—

"स्त्री शूद्र एवं आचारहीन ब्राह्मणों के लिये (ज्ञान कर्म तथा उपासना वाली) श्रुति श्रवणयोग्य नहीं है। इसीलिये कृपा करके भगवान वेदव्यास ने महाभारत नामक आख्यान का प्रणयन किया है"।

पृ० ३

अतएव अध्ययन आदि के लिये उपनीत ब्राह्मण क्षत्रिय एवं वैश्य का ही वेद से सम्बन्ध है।

वेद का प्रामाण्य उसके द्वारा ही स्वतः सिद्ध है। पौरुषेय वाक्य के बोधक होने पर भी पुरुष में भौतिक रूप से होनेवाली भ्रान्ति की सम्भावना से उसके परिहार के लिये मूलप्रमाण की अपेक्षा है। वेद के लिये ऐसी बात नहीं है। वेद नित्य है। उसमें वक्ता के अज्ञानादि दोष सम्भावित नहीं है।

इसीलिये जैमिनी ने सूत्र शैली में कहा—

वेद भी कालिदास आदि के वाक्य के समान पौरुषेय है। परमात्मा ने वेद का प्रणयन किया है। जैसा की वेद में ही कहा जाता है—

"उस परमात्मा से ऋचाएँ एवं साम उत्पन्न हुए, छन्दस् उत्पन्न हुए, तथा यजुष् उत्पन्न हुए।"

इसीलिये भगवान बादरायण ने 'शास्त्रयोनित्वात्' इस सूत्र के द्वारा "परमात्मा को वेद का कारण कहा है"।

यह कथन उपयुक्त नहीं है, क्योंकि श्रुति और स्मृति के द्वारा वेद की नित्यता प्रमाणित हो चुकी है।

(१) 'रूपरहित नित्य वेदवाणी के द्वारा' यह श्रुति वाक्य है।

(२) "अनादि अनन्त और नित्य वेद वाणी स्वयम्भू ब्रह्मा के द्वारा प्रकट की गई"।

बादरायण ने भी देवताधिकरण में सूत्र शैली में कहा है—

'इसीलिये वेदवाणी के नित्यता प्रमाणित है'।

पृ० ४

ऐसी स्थिति में बादरायण के वक्तव्य में ही परस्पर विरोध लक्षित होता है, ऐसा नहीं मानना चाहिये। वेदवाणी की नित्यता व्यावहारिक है। सृष्टि के बाद तथा संहार से पूर्व वेदवाणी का व्यवहार काल है तथा उस अवधि में वेदवाणी की उत्पत्ति और उसका विनाश नहीं दिखाई पड़ता। काल और आकाश आदि जैसे नित्य है उसी तरह वेद भी व्यवहारकाल में कालिदास आदि के वाक्य की तरह पुरुष के द्वारा विरचित न होने के कारण नित्य है। सृष्टि के आदि में काल और आकाश की तरह ही वेद के उत्पत्ति की बात कही गई है। अतः विषय भेद होने से परस्पर विरोध नहीं है।

Digitized by eGangotri

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

ब्रह्म दोषरहित है। अतः उससे उद्भूत वेद का वक्ता दोष रहित होना स्वयं सिद्ध है, प्रामाण्य निश्चित है।

अत एव लक्षण प्रमाण होने के कारण विषय, प्रयोजन, सम्बन्ध तथा अधिकार का विवरण स्थिर होने से और प्रामाण्य के स्थिर हो जाने के कारण वेद व्याख्यान करने योग्य है। यह निश्चित मत है।

उपर्युक्त विषय आदि के सम्बन्ध में निश्चित तथ्य स्थिर हो जाने के बाद उसको दृष्टि में रखकर 'अपने शाखा का अध्ययन करना चाहिये' इस विधिवाक्य के अनुसार वेदाध्ययन किया जाता है।

'स्वाध्यायोऽध्येतव्यः' इस अध्ययन विधिवाक्य में अध्ययन शब्द का अर्थ पाठ मात्र मानने से तथा "अर्थ की जानकारी भी करनी चाहिये" इसका निर्देश न होने से वेद का व्याख्यान करना उचित नहीं है।

'स्वाध्यायोऽध्येतव्यः' इस विधिवाक्य की समीक्षा

यह कथन उचित नहीं है, क्योंकि अध्ययन-विधिवाक्य में अध्ययन का अर्थ 'बोध' से है, केवल अक्षर ग्रहण से नहीं है। इस विषय पर कुमारिलभट्ट तथा प्रभाकरभट्ट के मतानुयायियों द्वारा बहुत प्रकार से विवेचित किया गया है। यह बात वेद में भी कही गई है--

"जो बिना अर्थ के वेदवाणी को ग्रहण किया है-पढ़ा है, केवल शब्द से ही उच्चारण किया है-रटा है, बिना अग्नि के सूखे हुए इन्धन की तरह वह अध्ययन कभी भी दीप्त नहीं होता-नही चमकता है"।

"जो वेद पढ़कर उसके अर्थ को नहीं जानता वह यह बोझ को ढोने वाला बिल्कुल वृक्ष का रूण्ड है। उस वृक्ष के सदृश है जो व्यर्थ ही फल पुष्पों के बोझ से तो लदा हुआ है पर उनके उपभोग से वञ्चित है। जो मनुष्य अर्थ को जानता है-वेदार्थ सम्पन्न है वही सारे कल्याण को प्राप्त करता है। इस संसार में वह शिष्टों के सम्मान को पाता है और मृत्यु के बाद ज्ञान से धुल गया है पाप जिसका ऐसा पवित्र होकर सीधे स्वर्ग को प्राप्त करता है"।

"ब्राह्मण का निष्कारण धर्म है कि वह छहों अंगो के साथ वेद का अध्ययन करे और उसे जाने"।

ऐसी स्थिति में ज्ञान का अलग विधान होने से अध्ययन का अर्थ पाठ मात्र मानना चाहिये" यह मत मान भी लिया जाय तो कोई अन्तर नहीं है। शाङ्करमत के अनुयायी इसी परम्परा का अनुसरण करते हैं।

क्रतु विधियों के द्वारा ही अनुष्ठान करना चाहिये, अन्यथा यज्ञ का अनुष्ठान उपपन्न नहीं हो सकता "वेद का अर्थ ज्ञान होना आवश्यक है" यह कथन स्वीकार योग्य नहीं होगा।

ऐसी स्थिति में उस विधि के बल से तथा वेद के पाठ मात्र के ज्ञान से कुछ स्वतन्त्र अपूर्व की उत्पत्ति होती है।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

यह सुना भी जाता है कि अनुष्ठान और ज्ञान का स्वतन्त्र अलग फल वर्णित है --

"समस्त पापों को पार करता है ब्रह्महत्या को पार करता है जो अश्वमेध के द्वारा यज्ञ करता है और जो उसके विधान को जानता है"।

ऐसी स्थिति अल्प प्रयास से ही यागों की जानकारी करके बहुत आयास से किये जाने वाले अनुष्ठानों का फल प्राप्त हो जायेगा अत एव उसका उपक्रम व्यर्थ है ! ऐसा कहना उचित नहीं है।

प्रायश्चित्त आदि विधियों के द्वारा तरणीय ब्रह्महत्या का मानसिक कायिक आदि भेद से अनेक प्रकार हैं। याग की जानकारी तथा 'यागानुष्ठान का सम्पादन' ये दोनों ही प्रायः समान फल देते हैं, किन्तु दोनों की तारतम्यानुसार संगति परस्पर माननी चाहिये।

मन के द्वारा संकल्पित, वाणी से समर्थित, दूसरे के द्वारा कराई गई, स्वयं की एकबार की गई तथा स्वयं पुनः पुनः की गई ब्रह्महत्या तारतम्यानुसार अनेक प्रकार की है। अतः उसके प्रायश्चित्त भी तारतम्यानुसार अनेक प्रकार के हैं। ऐसे ही स्वर्ग भी अनेक प्रकार के हैं।

(१) "स्वर्ग की कामना से अग्निहोत्र होम करना चाहिये।"

(२) "स्वर्ग की कामना से दर्श और पूर्णमास नामक इष्टियों से यजन करना चाहिए।"

तथा (३) "स्वर्ग की कामना से ज्योतिष्टोम के द्वारा यजन करना चाहिये।"

इत्यादि याग कर्मकाण्ड की दृष्टि से ऊँचे नीचे हैं। इन अग्निहोत्र, दर्श, पूर्णमास ज्योतिष्टोम आदि से एक प्रकार के फल सम्भव नहीं है। अतः स्वर्ग भी अनेक प्रकार का है।

उपर्युक्त कथन कर्मानुष्ठान के समय जानकारी को दृष्टि में रखकर कहा गया है। तात्पर्य यह है कि कर्मानुष्ठान के समय अर्थावबोध के साथ कार्य किया जाय तो उससे अधिक फल प्राप्ति होती है।

"दो व्यक्ति एक साथ याग का अनुष्ठान करते हैं उनमें एक व्यक्ति मन्त्रार्थ विना समझे अनुष्ठान करता है तथा दूसरा मन्त्रार्थ को जानते हुए, इनमें दूसरा व्यक्ति विशेष फल प्राप्त करता है।" यह कथन विद्वान और अविद्वान् को दृष्टि में रखकर कहा गया है।

'जो जानकारी के साथ याग का अनुष्ठान करता है, उसका अनुष्ठान अत्यन्त तेजस्वी होता है' ऐसा भी कहा गया है।

Funding by MoE-IKS

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

यह कथन ठीक नहीं है, क्योंकि सभी सिद्धान्त एक समान होते है अर्थात् समान अधिकारी के लिये किये गये याग समान फल प्राप्ति कराने वाले होते हैं।

परन्तु वेद में अर्थ के महत्त्व देने वाले चिह्न उपलब्ध होते हैं।

पृ० ५

प्रजापति ने सोमयाग से अर्वाचीन परस्पर ऊँचे नीचे अग्निहोत्र दर्शपूर्णमास आदि नामक यागों को उत्पन्न किया।

सोमसंस्था के यागों को, जो कि अग्निहोत्र आदि से प्रौढ है, अग्निष्टोम, उक्थ्य, अतिरात्र नामक यागों को जो कि तारतम्यानुसार महत्व की दृष्टि से परस्पर ऊँचे नीचे हैं, उनकी सृष्टि करके पहले उत्पन्न किये गये, और अग्निहोत्र आदि यागों को अभिमान विशेष के कारण दोनों वर्गों को तुला से तौला गया।

इस वृत्तान्त को जानने से यजमान अग्निहोत्र करके भी अग्निष्टोम आदि विशेष यागों के करने के फल को प्राप्त करता है। यह बात ब्राह्मण ग्रन्थ में कही गई है—

"प्रजापति ने यज्ञों को उत्पन्न किया और उन्होंने अग्निहोत्र और अग्निष्टोम को, पौर्णमासेष्टि और उक्थ्य को तथा दर्शेष्टि और अतिरात्र को परस्पर तराजू पर तौला। तौलने से यह ज्ञात हुआ कि, जितना अग्निहोत्र था उतना ही अग्निष्टोम था, जितना पौर्णमासेष्टि थी उतना ही उक्थ्य था, जितना दर्शेष्टि थी उतना ही अतिरात्र याग था।

इस तथ्य को जानने वाला जो विद्वान् अग्निहोत्र होम करता है वह अग्निष्टोम याग करने से जितना फल प्राप्ति होती है उतना ही फल अग्निहोत्र से प्राप्त करता है।

इस तथ्य को जानने वाला जो विद्वान् पौर्णमासेष्टि के द्वारा याग करता है वह, उक्थ्य याग करने से जितना फल मिलता है, उतना ही फल पौर्णमासेष्टि करके प्राप्त करता है।

इस तथ्य को जानने वाला जो विद्वान दर्शेष्टि करता है वह, अतिरात्र करने से जितना फल मिलता है, उतना ही फल दर्शेष्टि के द्वारा प्राप्त करता है"।

इस प्रकार केवल याग के अनुष्ठान विधियों की जानकारी का अपना स्वतन्त्र फलदान सामर्थ्य है। यह ही 'अर्थ' को महत्त्व देने वाला चिह्न है।

किन्तु अलग-अलग विधिवाक्यों के साथ 'य एवं वेद' इस वचन का निर्देश किया गया है। ये वाक्य अर्थवाद रूप है तो ये अर्थवाद रूप हो जायें इस अनुमान का हम सहन कर सकते हैं क्योंकि ये वाक्य विधेय अर्थ के प्रशंसा परक हैं।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

ऐसी स्थिति में 'यत्परः शब्दः स शब्दार्थः' जिस अर्थ के बोध लिये जिस शब्द का प्रयोग किया गया है, वह ही शब्द का अर्थ है' इस कथन का अपने अर्थ में कोई प्रामाण्य नहीं है'।

ऐसा नहीं कहना चाहिये क्योंकि महत्तात्पर्य के विधान करने योग्य विषय होने पर भी अवान्तर तात्पर्य के स्वार्थ विषयता का निवारण हो जाता है।

"पत्थर तैरते है" इस अर्थवाद वाक्य का भी स्वार्थ बोधन में प्रामाण्य हो आयेगा ऐसा नहीं मानना चाहिये क्योंकि यह कथन प्रमाणान्तर से बाधित है।

"एक संवत्सर में दो बार फल पकते हैं"। इत्यादि अर्थवाद वाक्य का तो विरोधी कथन के अभाव में भी स्वार्थ बोधन में अनुवाद होने के कारण प्रमाण नहीं है।

जानकारी सम्बन्धी (य एव वेद) कथन न अनुवाद वाक्य है और न बाध्य वाक्य है। अत एव अर्थवाद होने पर भी इस (य एव वेद) वाक्य का स्वार्थ में प्रामाण्य है। ऐसा न मानने पर मन्त्र और अर्थवाद आदि के द्वारा देव आदि का स्वरूप वाला होना सिद्ध नहीं होगा।

इसीलिये कहा गया है—

'विरोध होने पर गुणवाद' अवधारण होने पर अर्थवाद तथा निषेध होने पर भूतार्थवाद होता है–इस प्रकार अर्थवाद तीन प्रकार का है'।

इस सन्दर्भ में विशेष क्या कहना है। जानकारी मात्र से अपूर्व फल प्राप्ति होती है। अतः जानकारी (वेदन) के लिए वेद का व्याख्यान करना चाहिये।

यह जो 'विषय' के रूप में कहा गया कि वेद इष्ट प्राप्ति तथा अनिष्ट-परिहार के उपाय को बतलाया है अतः यह वेद है। इसका सामान्यता विश्लेषण किया गया है। अब विशेष विवरण प्रस्तुत करते है।

वेद के विषय विभाग का विवरण एवं पूर्णकाण्ड की समीक्षा

वेद में दो काण्ड हैं। प्रथम काण्ड में नित्य, नैमित्तिक, काम्य, निषिद्ध ये चार प्रकार के कर्म प्रतिपाद्य हैं।

१. "पूरे जीवन काल तक अग्निहोत्र होम करना चाहिये" इत्यादि वाक्य नित्य अनुष्ठान का विश्लेषण करते हैं क्यों कि नित्य इनका अनुष्ठान करना निश्चित किया जा चुका हैं।

२. "जिस अग्निहोत्री के घर को अग्नि जला देता है, उस अग्नि-होत्री को क्षामवान अग्नि के लिये आठ कपालों वाले पुरोडाश का निर्वाप करना चाहिये"–इत्यादि वाक्य नैमित्तिक कर्म का विश्लेषण करते हैं।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

३. 'पशु प्राप्ति की इच्छा से चित्रा नामक इष्टि के द्वारा यजन करे' यह वाक्य काम्यकर्म विश्लेषक है।

४. "इसिलिये मलिन कपड़ा पहने हुए व्यक्ति से बात नहीं करना चाहिए और न उनके साथ बैठना चाहिये इत्यादि वाक्य निषिद्धकर्म का विश्लेषण करते हैं।

इनमें नित्य तथा नैमित्तिक कर्मों का अनुष्ठान करने से इन कर्मों के न किये जाने से उत्पन्न प्रत्यवाय रूप अनिष्ट का परिहार होता है।

इस प्रत्यवाय के सम्बन्ध में याज्ञवल्क्य ने कहा है—

पृ० ६

"विहित कर्म का अनुष्ठान न करने से निन्दित कर्म का सेवन करने से तथा इन्द्रियों को वश में न रखने से मनुष्य पतन को प्राप्त होता है।"

'यावज्जीवमग्निहोत्रं जुहोति' इत्यादि वाक्यों मे न कहे जाने पर भी कहीं से निषेध न होने से अपने आपको अभीष्ट स्वर्ग रूप फल की प्राप्ति होती है।

आपस्तम्ब ने भी कहा है कि-"जैसे आम्र फल की प्राप्ति के लिये वृक्ष लगाने पर वृक्ष की छाया और फल में मञ्जरी आने पर उसका गन्ध भी मिलता है, वैसे ही यागादिरूप धर्मका आचरण करने पर तत्सम्बद्ध अर्थ स्वयं उत्पन्न हो जाते हैं।

काम्यकर्म करने से इष्ट फल की प्राप्ति होती है। यह तथ्य काम्य कर्म से सम्बन्धित विधि वाक्य में ही स्पष्ट किया जा चुका है। इस काम्यकर्मानुष्ठान से "इष्ट का विधान" तथा "अनिष्ट" इन दोनों का स्वयं परिहार हो जाता है।

निषिद्ध कर्म का निषेध करने वाले वाक्य के द्वारा निषिद्ध कर्म के आचरण का निषेध बतला कर स्वभाव से प्राप्त निषिद्ध कर्म के अनुष्ठान से उत्पन्न नरक आदि की प्राप्ति का परिहार सूचित करते हैं।

केवल नित्य तथा नैमित्तिक अनुष्ठान के द्वारा आनुषंगिक स्वर्ग की प्राप्ति ही नहीं होती है, बल्कि बुद्धि की शुद्धि के द्वारा जानने की इच्छा से ब्रह्मज्ञान की प्राप्ति होती है और इस प्रकार नित्य तथा नैमित्तिक अनुष्ठान उसके हेतु भी बन जाते है।

वाजसनेय परम्परा के लोग भी कहते है-

"ब्राह्मण लोग उस इस परमात्मा को वेदानुवचन के द्वारा, यज्ञ के द्वारा, दान के द्वारा तथा न नष्ट होने वाले तप के द्वारा जानने की इच्छा करते हैं।"

"इस प्रकार पूर्वकाण्ड के द्वारा ही सभी पुरुषार्थ सिद्ध हो जाते हैं ऐसी स्थिति में उत्तरकाण्ड व्यर्थ है।"

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

यह कथन उचित नहीं हैं— संसार में पुनः जन्मग्रहण न हो आत्यन्तिक मुक्ति रूप पुरुषार्थ की सिद्धि पूर्वकाण्ड से सम्भव नहीं है ।

इसीलिये आथर्वणिक कर्मकाण्डी लोग दक्षिण मार्ग से चन्द्रलोक की प्राप्ति और पुण्य क्षीण होने के बाद पुनः संसार में जन्म होना स्वीकार करते हैं ।

"वह यजमान सोमलोक में विभूति का अनुभव करके पुण्यक्षीण होने के बाद पुनः इस संसार में जन्म ग्रहण करता है ।"

उत्तरकाण्ड की विषय योजना

अब उत्तरकाण्ड के विषय का विचार प्रारम्भ करते हैं । आत्यन्तिक पुरुषार्थ मोक्ष की सिद्धि दो प्रकार की होती है—सद्योमुक्ति तथा क्रममुक्ति । वर्तमान देहपात के बाद ही सद्योमुक्ति सिद्ध होती है । मृत्यु के बाद उत्तर-भाग से ब्रह्मलोक में जाकर चिर काल तक विविध भोगों का अनुभव करके वहाँ उत्पन्न हुए ज्ञान की सहायता से ब्रह्मलोक में वास के बाद क्रममुक्ति सिद्ध होती है । इसलिये उत्तरकाण्ड में ब्रह्मोपदेश तथा ब्रह्मोपासना इन दोनों का प्रतिपादन किया गया है ।

ब्रह्मोपासना के प्रसंग में ब्रह्म की दृष्टि से प्रतीक को उपास्य के रूप में सांसारिक फल चाहने वालों के लिये प्रतिपादन किया गया है । ब्रह्मोपासक तथा प्रतीकोपासकों के लिये समान उत्तरमार्ग होने पर भी प्रतीकोपासक का विद्युत् लोक से ऊपर ब्रह्मलोक गमन न होने से क्रम-मुक्ति नहीं होती है और इस प्रकार संसार में पुनः जन्मग्रहण करना पड़ता है ।

इस तथ्य का विवेचन वेदान्तसूत्र के "अप्रतीकालम्बनान् नयति" इस अधिकरण में देखा जा सकता है ।

दर्शपूर्णमासेष्टियों का प्राथम्य

यह मान लिया जाय कि पूर्व और उत्तर ये दो काण्ड वेद में हैं और उनमें जहाँ तहाँ उचित प्रयोजन तथा फल-विशेष भी हैं । तब भी पूर्वकाण्ड के प्रारम्भ में अन्य किसी कर्मकाण्ड की प्रक्रिया का विवरण न करके दर्शेष्टि तथा पूर्णमासेष्टि का ही क्यों प्रतिपादन किया गया है ? इसके समाधान में यह कहा जाता है कि सभी यागों में प्रकृति याग होने से तथा निरपेक्ष होने से दर्श और पूर्णमास का सर्वप्रथम प्रतिपादन किया गया है ।

जहाँ पर सभी अङ्ग तथा उपाङ्ग का उपदेश किया जाता है । उसे प्रकृति याग कहते हैं । विकृति यागों में केवल विशेष अङ्गों का निर्देश किया जाता है और अन्य अङ्गों का प्रकृतियाग से अनुकरण किया जाता है । अनुकरण या अतिदेश होने के कारण प्रकर्ष का अभाव होता है । इसीलिये उसे विकृति-याग मानते हैं ।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

प्रकृतियाग तीन प्रकार का होता है–अग्निहोत्र, इष्टि और सोमयाग इन तीनों में अन्य की निरपेक्षता सहित उनके अपने अपने सभी अङ्गयागों का विवेचन किया गया है। उनमें सोमयाग का स्वरूप से अन्य से निरपेक्ष अङ्ग होने से दीक्षणीया आदि इष्टियों में दर्श एवं पूर्णमासेष्टि पर सापेक्ष होने से सोमयागों का पूर्व भावित्व उपयुक्त नहीं है। इष्टि का सोमयाग से निरपेक्ष होने से सोमयाग से प्राचीन होना उचित है।

यद्यपि अग्निहोत्र का अपने रूप में अथवा अङ्गों में अन्य की अपेक्षा नहीं हैं तब भी अग्नि की सिद्धि की अपेक्षा होने से आहवनीय आदि अग्नियों का पवमानेष्टि के द्वारा साधन सम्भव है और पावमानोष्टियों का दर्शपूर्णमास की विकृति होने से परम्परया अग्निहोत्र को दर्श और पूर्णमास की अपेक्षा होती है। अतः अग्निहोत्र का प्रथम होना उचित नहीं है।

पृ० ७

'दर्शपूर्णमासयागों का सम्पादन अग्नि की सहायता से ही सम्भव है और अग्नि का साधक आधान है, अतः इसे ही प्राथमिक रूप से स्वीकार करना चाहिये' यह कथन उचित नहीं है, क्योंकि केवल आधान मात्र से अग्नि की सिद्धि सम्भव नहीं हैं बल्कि पवमानेष्टियों के द्वारा भी अग्नि की सिद्धि होती है। वे इष्टियां दर्श एवं पूर्णमास की विकृति होने के कारण साक्षात् दर्शपूर्णमास पर निर्भर हैं।

दर्श एवं पूर्णमास दोनों अग्नि के द्वारा पवमानेष्टि सापेक्ष होने पर भी साक्षात् पवमानेष्टि पर निर्भर नहीं हैं। अतः निरपेक्ष होने के कारण दर्शपूर्णमासेष्टि का विवरण अपेक्षित है।

ऋग्वेद एवं सामवेद में दर्शपूर्णमासेष्टि का विवरण प्रारम्भ में नहीं किया गया है। यह भी ठीक है।

कर्मकाण्ड विषय में यजुर्वेद का प्राधान्य है। अत एव यजुर्वेद को दृष्टि यजुर्वेद का प्राधान्य में रखकर दर्श और पूर्णमास के प्राथम्य को कहा गया है।

कर्मकाण्ड में कर्म के स्वरुप का उपपादन करते हुए आनुपूर्व्यशः यज्ञ विवरण यजुर्वेद में किया गया है।

यागविधियों के सम्पादन करने से तत्तत् यागों में अपेक्षा होने पर याज्या एवं पुरानुवाक्या आदि के मन्त्र ऋग्वेद में कहे गये हैं। स्तोत्र सम्बन्धी मन्त्र साम गान में निर्दिष्ट हैं।

ऐसा होने से एक चित्र की परिकल्पना करने पर भित्ति स्थान में यजुर्वेद है, चित्र के स्थान पर अन्य दो अर्थात् ऋग्वेद तथा सामवेद का परिग्रहण करना चाहिये।

इसीलिये सभी कर्मकाण्ड में यजुर्वेद का प्राधान्य है और उसमें में भी दर्श और पूर्णमासेष्टि का प्राथमिक रूप से विवेचन किया गया है।

Digitized by eGangotri

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

यद्यपि मन्त्र और ब्राह्मणात्मक वेद है तब भी ब्राह्मण का मन्त्र के व्याख्यान के रूप में होने के कारण मन्त्रों का प्राथमिक रूप से परिगणन किया जाता है।

मन्त्र तीन प्रकार के हैं–ऋचायें, साम तथा यजुष्। उनमें भी यजुषों का मन्त्रभेद अधिक्य होने से कहीं कहीं ऋचाओं के होने पर भी अध्वर्युवेद को यजुर्वेद ही कहा जाता है।

अध्वर्युवेद का नामकरण अनादि सिद्ध याज्ञिकों की समाख्या के बल से जानना चाहिये।

इस वेद में एकत्र किये गये दर्शपूर्णमासेष्टि से सम्बन्धित मन्त्र तीन प्रकार के हैं अध्वर्यु सम्बन्धी, यजमान सम्बन्धी तथा होता सम्बन्धी।

'इषेत्वा' इत्यादि प्रपाठक में पठित मन्त्र अध्वर्यु सम्बन्धी हैं।

'सं त्वा सिञ्चामि' इत्यादि प्रपाठक में पठित मन्त्र यजमान से सम्बन्धित है।

'सत्यं प्रपद्ये' इत्यादि मन्त्र होता सम्बन्धी हैं।

इनमें याजमान तथा हौत्र मन्त्रों का चित्र स्थानीय होने के कारण तथा आध्वर्यव मन्त्र का भित्ति स्थानीय होने से उसका ही पाठ प्राथमिक रूप से करना उचित है। आध्वर्यव मन्त्र 'इषेत्वा' इत्यादि तेरह अनुवाकों के रूप में पढ़े गये हैं।

प्रथम अनुवाक के विषय

प्रथम अनुवाक में वत्सापकरण मन्त्र दूसरे में बर्हिष सम्पादन मन्त्र तीसरे दोहन मन्त्र, चौथे में हविर्निर्वाप मन्त्र, पांचवें व्रीह्यवघात मन्त्र, छठेंमें तण्डुलपेषण मन्त्र, सातवें में कपालोपधाम मन्त्र, आठवें में पुरोडाश निष्पादन मन्त्र, नवमें वेदीकरण मन्त्र, दसवें मुख्यतः आज्य ग्रहण से सम्बन्धित एवं प्रसङ्गतः पत्नी संनहन के मन्त्र, ग्यारहवें में इध्म सन्नहन, बर्हिष् आदि के आस्तरण के मन्त्र तथा बारहवे में आधार मन्त्र हैं। यहाँ सामधेनी, प्रयाज, आज्यभाग, प्रधानयाग आदि मन्त्रों का अवसर प्राप्त होने पर भी इन मन्त्रों के होता से सम्बन्धित होने के कारण उनकी उपेक्षा करके अन्य प्रयोगों के अंगभूत अध्वर्यु सम्बन्धी स्रुग्व्यूहन आदि मन्त्र तेरहवें अनुवाक में संगृहीत हैं।

इन सभी बातों को विनियोग संग्रहकार ने निम्नलिखित प्रकार से संगृहीत किया है–

जो दर्श तथा पूर्णमास के अंग से सम्बन्धित मन्त्र है वे संक्षेपतः तेरह अनुवाकों में है। वत्सापाकरण, बर्हिष्, दोहन, निर्वाप, कण्डन, पेषण, कपालोपधान पुरोडाश, वेदिकरण, आज्यग्रहण, इध्मसंनहन आधार उपरितन्त्र ये अनुवाकों के अर्थ है। प्रतिमन्त्र किस का विवरण किया जायेगा।

Digitized by IKS-MDE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

पृ० ८

वत्सापकरण का प्रपञ्च

यह वत्सापाकरण क्या है ? इसकी प्राथमिकता क्यों है ? इस सन्दर्भ में कहा जाता है—दर्शयाग में तीन हविर्द्रव्य होते हैं और पूर्णमास याग में भी तीन हविर्द्रव्य हैं। अग्नि का अष्टाकपाल पुरोडाश, इन्द्र की दही और इन्द्र का ही दूध ये तीन है। पूर्णमास याग में अग्नि का अष्टाकपाल पुरोडाश, आज्य से प्रजापति का उपांशु याग तथा अग्नीषोम को एकादश कपाल पुरोडाश होता है।

प्रतिपत् तिथि को दधि होम के निमित्त दधि बनाने के लिए अमावास्या की रात्री में गाये दुहनी चाहिये। दोहन के लिये प्रातःकाल लौकिक दोहन के बाद अपनी अपनी माताओं के साथ घूमने वाले बछड़ों को उनकी माताओं से अलग चरना चाहिये। इस प्रकार वर्णित यह वत्सापाकरण और उसका प्राथम्य स्थिर हो जाता है।

वत्सापकरण तुरन्त तोड़ी गई पलाश की शाखा से ही करना चाहिए। उसके छेदन के लिये ही 'इषे त्वा—' इत्यादि मन्त्रों को प्राथमिक रूप से कहा गया है। इस मन्त्र का पलाश की शाखा के छेदन का अंगभूत होना ब्राह्मणग्रन्थ में निर्दिष्ट है। अत एव ब्राह्मणग्रन्थ के साथ मन्त्र का अध्ययन करना चाहिये। छन्दोग लोग कहते हैं—

"जो व्यक्ति ऋषि सम्बन्ध, छन्द, देवता सम्बन्ध तथा ब्राह्मण ग्रन्थ के सन्दर्भ को न जाने गये मन्त्र के द्वारा यज्ञ करता है, यज्ञ कराता है, पढ़ाता है, वह अपने स्थान से च्युत होता है अनपेक्षित मन्त्र के प्रयोग द्वारा गड्ढे में गिराया जाता है, मारा जाता है तथा पापी होता है। अत एव प्रत्येक मन्त्र का ऋषि सम्बन्ध, छन्द देवतासम्बन्ध तथा उसका ब्राह्मण सन्दर्भ जानना चाहिये।"

यहां 'आर्षेय' का अर्थ 'ऋषि सम्बन्ध' से है। अतिन्द्रिय अर्थ के द्रष्टा ऋषि होते हैं। उन्हें "वेद द्रष्टा के रूप में" स्मरण किया जाता है—

"स्वयम्भू के द्वारा प्राथमिक रूप से अनुज्ञात होकर ऋषियों ने युग के अन्त में छिपे हुए वेदों को इतिहासों के साथ तपस्या के बल से प्राप्त किया।"

'इषेत्वा—' इत्यादि मन्त्रों का प्रजापति ऋषि है और बातें काण्डानुक्रमणिका में कही गई है—

'शाखा का आदि, याज्यामन्त्र, इध्मसंनहन सम्बन्धी मन्त्र, दर्शसम्बन्धी हौत्र कर्म, उनकी विधियों के प्रतिपादक चार ब्राह्मण तथा पितृमेध ये नौ प्रजापति सम्बन्धी काण्ड है—ऐसा वेद के अर्थ के जानकार लोग कहते हैं।"

Funding by MoE-IKS

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

तैत्तिरीय शाखा के प्रथम काण्ड का प्रारम्भ 'इषे त्वा' आदि प्रपाठक से है। दूसरे यजमान सम्बद्ध 'स त्वा

तैत्तिरीय संहिता की काण्डानुक्रमणिका सिञ्चामि–' इत्यादि मन्त्र हैं। तीसरे हवन सम्बन्धी, उपकरण पारिचायक 'चित्ति स्रुग्'–आदि के मन्त्र हैं। चौथे 'सत्यं प्रपद्ये' इत्यादि दर्श सम्बन्धी होता नामक ऋत्विक् मन्त्र हैं। पांचवां, छठां, सातवां तथा आठवां काण्ड प्रयोग के रूप में पहले कहे गये चार काण्डों के मन्त्रों से सम्बन्धित चार ब्राह्मण वाले है। नवां पितृमेध सम्बन्धी 'परे युवाꣳ सम्' इत्यादि मन्त्र का काण्ड हैं। ये नव काण्ड प्रजापति के द्वारा देखे गये हैं।

छन्द विशेषों को वेदाङ्गभूत छन्दस् नामक ग्रन्थ से देखना चाहिये। मन्त्र के पदों का व्याख्यान करने से ही उसके प्रतिपाद्य अर्थ रूप देवता का ज्ञान हो जाता है। ब्राह्मण विशेष को उन उन मन्त्रों के व्याख्यान के अवसर पर उदाहरण के रूप में प्रस्तुत किया जाएगा। यद्यपि ब्राह्मण में सभी मन्त्रों के विनियोग कहे नहीं गये है तब भी कल्पसूत्रकारों के द्वारा तथा अन्य ब्राह्मण ग्रन्थों के पर्यालोचन के द्वारा सभी मन्त्रों के विनियोग आगे भाष्य में कहे गये है। अतः ब्राह्मण ग्रन्थ के अनुसार बोधायन आदि सूत्र तथा उसके उदाहरण आदि के साथ मन्त्रार्थ की योजना की जायेगी।

॥ तैतिरीय संहिता भाष्य भूमिका समाप्त ॥



Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.



Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

Funding by IKS-MoE